# Atma Bodha

# આત્મબોધઃ

## Document Information

Text title : Atmabodha

File name : aatmabodha.itx

Category : shankarAchArya

Location : doc_z_misc_shankara

Author : Adi Shankaracharya

Transliterated by : Kim Poulsen (poulsen at dk-online.dk)

Proofread by : M. Giridhar giridhar at chemeng.iisc.ernet.in, Sunder Hattangadi David Lyttle dhlyttle at hotmail.com, Sreenivasa Rao Bhagavatula

Description-comments : Samata Edition of Complete works of Shankaracharya

Latest update : March 4, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# Atma Bodha

## આત્મબોધઃ

નમઃ શ્રીશઙ્કરાનન્દગુરુપાદામ્બુજન્મને ।
સવિલાસમહામોહગ્રાહગ્રાસૈકકર્મણે ॥
namaH shrIsha NkarAnandagurupAdAmbujanmane .
savilAsamahAmohagrAhagrAsaikakarmaNe ..

– panchadashI

'I bow at the lotus feet of the Guru, Shankara, whose function is to eliminate the alligator of delusion (moha) with all its branches.'

Atma Bodha, meaning self knowledge, was composed by Adi Shankara sometime in the 8th century.

To quote Sri Radhakrishnan 'The Advaitism of Shankara is a system of great speculative daring and logical subtlety . Its austere intellectualism, its remorseless logic, which marches on indifferent to the hopes and beliefs of man, its relative freedom from theological obsessions, make it a great example of a purely philosophical scheme . It is impossible to read Shankara's writings, packed as they are with serious and subtle thinking, without being conscious that one is in contact with a mind of a very fine penetration and profound spirituality . With his acute feeling of the immeasurable world, his stirring gaze into the abysmal mysteries of the spirit, his unswerving resolve to say neither more nor less than what could be proved, Shankara stands out as a heroic figure of the first rank in the somewhat motley crowd of the religious thinkers of medieval India ....

Shankara taught us to love Truth, respect reason and realize the purpose of life . Twelve centuries have passed, and yet his influence is visible.'

His influence on Indian philosophy is so enormous that most of the later philosophies that evolved in India had either to agree with him or disagree with him, quoting him nevertheless.

Shankara, in his indisputable style, allows a place for Karma and Bhakti while emphasising the prime necessity of j nAna for the realization of the Self . For example, while commenting on Bhagvadgita 18.45, he takes Bhakti to be identical to j nAna by quoting 7.16-18 of the gItA where Krishna says that a j nAni is one of His Bhaktas.

In Vivekachudamani, he goes on to say that Bhakti is one of the most conducive causes for liberation . Similarly, in the third verse of atma bodha, he says that karma is not opposed to ignorance, though it can not destroy ignorance . Undoubtedly a great religious reformer and philosopher, Shankara embraces within his fold all pantheism while maintaining the principle of non-duality.

Though Shankara is famous for his commentaries (bhAShya-s) on the three major texts considered as 'launching pad' for liberation (prasthAnatrayI, the triple cannon),
namely bhagvad gItA, brahmasUtra-s, and upaniShad-s, he has composed a large number of stotra-s (hymns in praise of various gods) and also brief expositions in prose and verse (prakaraNa-s ). Atma Bodha falls into the last category . A rare but an excellent commentary of this work in Sanskrit has been provided by Swami kRiShNAnandAshramI and has been translated in to english by Vidyaratna Menon . Other noteworthy translations of the text are by Swami Chinmayananda, Swami Nikhilananda, TMP Mahadevan, and Parthasarathy, to name a few.

The text of Atmabodha avoids the technicalities found in the vedas, but conveys the message of jnana yoga (the path of knowledge) to the layman . In a short compendium of sixty eight stanzas, the knowledge of the Self is described in an unique and simple style . Shankara starts with the requirements of the aspirant, and goes on to explain the nature of world -Samsara, the embodiments of the soul, the influence of mAyA and the superimposition of Atman . He describes the meditation technique based on

aphorism ‘I am Brahman,’ the supreme being,
‘Aham Brahmasmi’, and elucidates the fruits of Self-realization and the state of the jivanmukta (liberated soul).

Since the realization of the Self can not be had from books or scriptures, Shankara insists on the necessity of instruction by a Self-realized Guru (teacher). The intense desire to liberate and the effort required by the sAdhaka (aspirant) is emphasized . If there is no effort, there can not be a result . As Sri Radhakrishnan says ‘People in our society have resolved to renounce nothing, but wish to enjoy the fruit of renunciation.’ The vedanta kesari puts it ‘The goal we desire (should be) to reach the ideal society of the prophets, a society of just, peaceful, morally and intellectuially progressive community of non attached and responsible individuals, the means we adopt therefore must be worthy of the ends . Then only the real age of millennium will dawn wherein one feels that the whole world is one’s family of kith and kin, a place for nothing but love and fellow feeling, in short a vasudhaivakuTumbakam (universe as a family).’

Commenting on the first verse of Atma Bodha, the sanskrit commentator, Swami kRiShNAnandAshramI, remarks that Sri Shankaracharya composed the three great bhashyas (of the upaniShads, gItA, and brahma sUtra) for the guidance of people qualified by birth, environment, circumstances, and mental, moral and spiritual development . Out of great compassion for the rest of the masses, Shankara composed Atmabodha for explaining the knowledge of the Self.

The treatise of the knowledge of self, Atmabodha, is meant for those whose sins have been destroyed by religious austerities, who are calm, devoid of attachment and are persons desirous of liberation (i.e . mumukShu-s desirous of mokSha).
The qualified are those who have the four fold requisities, 1. discrimination between real and unreal (viveka) 2. non-attachment (i.e indifferent to the results of one’s action) 3. desire for emancipation (mumukShu-s) and 4. the six fold qualities,

a . sAma (restraint of internal senses)

b . dAma (restraint of external senses)

c . uparati (control of senses, without jumping from one object to another)

d . samAdhAna (mind constantly on the Self)

e . titIkShA (indifferent endurance)

f . shraddhA (faith).

The rest of the sixty seven verses may be roughly classified in to the following subjects, means for emancipation (2-5), sa.nsAra (6-12), various sharIra-s (embodiments) (13-19), adhyAsa (15-19), aha.nkAra (26-30), doctrine of neti-neti (31-36), sAdhanA (37-39), self-realization (40-46), vision of a j nAnI and characteristics of a jivanmukta (47-53), and finally the nature of Brahman (54-68).

May the great AchArya, one of the greatest persons to grace this planet, Shankara, make us aware of His grace.

## ॥ આત્મબોધઃ ॥

.. AtmabodhaH ..

તપોભિઃ ક્ષીણપાપાનાં શાન્તાનાં વીતરાગિણામ્ ।
મુમુક્ષૂણામપેક્ષ્યોઽયમાત્મબોધો વિધીયતે ॥ ૧॥

બોધોઽન્યસાધનેભ્યો હિ સાક્ષાન્મોક્ષૈકસાધનમ્ ।
પાકસ્ય વહ્નિવજ્જ્ઞાનં વિના મોક્ષો ન સિધ્યતિ ॥ ૨॥

અવિરોધિતયા કર્મ નાવિદ્યાં વિનિવર્તયેત્ ।
વિદ્યાઽવિદ્યાં નિહન્ત્યેવ તેજસ્તિમિરસઙ્ઘવત્ ॥ ૩॥

પરિચ્છિન્ન ઇવાજ્ઞાનાત્તન્નાશે સતિ કેવલઃ । var અવચ્છિન્ન
સ્વયં પ્રકાશતે હ્યાત્મા મેઘાપાયેંઽશુમાનિવ ॥ ૪॥

અજ્ઞાનકલુષં જીવં જ્ઞાનાભ્યાસાદ્વિનિર્મલમ્ ।
કૃત્વા જ્ઞાનં સ્વયં નશ્યેજ્જલં કતકરેણુવત્ ॥ ૫॥

સંસારઃ સ્વપ્નતુલ્યો હિ રાગદ્વેષાદિસઙ્કુલઃ ।
સ્વકાલે સત્યવદ્ભાતિ પ્રબોધે સત્યસદ્ભવેત્ ॥ ૬॥

તાવત્સત્યં જગદ્ભાતિ શુક્તિકારજતં યથા ।
યાવન્ન જ્ઞાયતે બ્રહ્મ સર્વાધિષ્ઠાનમદ્વયમ્ ॥ ૭॥

ઉપાદાનેऽખિલાધારે જગન્તિ પરમેશ્વરે ।
સર્ગસ્થિતિલયાન્ યાન્તિ બુદ્બુદાનીવ વારિણિ ॥ ૮॥ var not in some editions

સચ્ચિદાત્મન્યનુસ્યૂતે નિત્યે વિષ્ણૌ પ્રકલ્પિતાઃ ।
વ્યક્તયો વિવિધાઃ સર્વા હાટકે કટકાદિવત્ ॥ ૯॥

યથાકાશો હૃષીકેશો નાનોપાધિગતો વિભુઃ ।
તદ્ભેદાદ્ભિન્નવદ્ભાતિ તન્નાશે કેવલો ભવેત્ ॥ ૧૦॥

નાનોપાધિવશાદેવ જાતિવર્ણાશ્રમાદયઃ । var જાતિનામાશ્રમાદયઃ
આત્મન્યારોપિતાસ્તોયે રસવર્ણાદિ ભેદવત્ ॥ ૧૧॥

પંચીકૃતમહાભૂતસંભવં કર્મસંચિતમ્ ।
શરીરં સુખદુઃખાનાં ભોગાયતનમુચ્યતે ॥ ૧૨॥

પંચપ્રાણમનોબુદ્ધિદશેન્દ્રિયસમન્વિતમ્ ।
અપંચીકૃતભૂતોત્થં સૂક્ષ્માઙ્ગં ભોગસાધનમ્ ॥ ૧૩॥

અનાદ્યવિદ્યાऽનિર્વાચ્યા કારણોપાધિરુચ્યતે ।
ઉપાધિત્રિતયાદન્યમાત્માનમવધારયેત્ ॥ ૧૪॥

પંચકોશાદિયોગેન તત્તન્મય ઇવ સ્થિતઃ ।
શુદ્ધાત્મા નીલવસ્ત્રાદિયોગેન સ્ફટિકો યથા ॥ ૧૫॥

વપુસ્તુષાદિભિઃ કોશૈર્યુક્તં યુક્ત્યવઘાતતઃ । (યુક્ત્યાऽવઘાતતઃ)
આત્માનમન્તરં શુદ્ધં વિવિચ્યાત્તણ્ડુલં યથા ॥ ૧૬॥
var વિધ્યર્થ વિવિઞ્ચ્યાત્, આશીર્લિઙ્ગ benedictive વિવિચ્યાત્

સદા સર્વગતોऽપ્યાત્મા ન સર્વત્રાવભાસતે ।
બુદ્ધાવેવાવભાસેત સ્વચ્છેષુ પ્રતિબિમ્બવત્ ॥ ૧૭॥

દેહેન્દ્રિયમનોબુદ્ધિપ્રકૃતિભ્યો વિલક્ષણમ્ ।
તદ્વૃત્તિસાક્ષિણં વિદ્યાદાત્માનં રાજવત્સદા ॥ ૧૮॥

વ્યાપૃતેષ્વિન્દ્રિયેષ્વાત્મા વ્યાપારીવાવિવેકિનામ્ ।
દૃશ્યતેऽભ્રેષુ ધાવત્સુ ધાવન્નિવ યથા શશી ॥ ૧૯॥

આત્મચૈતન્યમાશ્રિત્ય દેહેન્દ્રિયમનોધિયઃ ।

સ્વક્રિયાર્થેષુ વર્તન્તે સૂર્યાલોકં યથા જનાઃ । ૨૦ ॥

દેહેન્દ્રિયગુણાન્કર્માણ્યમલે સચ્ચિદાત્મનિ ।
અધ્યસ્યન્ત્યવિવેકેન ગગને નીલતાદિવત્ ॥ ૨૧ ॥

અજ્ઞાનાન્માનસોપાધેઃ કર્તૃત્વાદીનિ ચાત્મનિ ।
કલ્પ્યન્તેઽમ્બુગતે ચન્દ્રે ચલનાદિ યથામ્ભસઃ । ૨૨ ॥

રાગેચ્છાસુખદુઃખાદિ બુદ્ધૌ સત્યાં પ્રવર્તતે ।
સુષુપ્તૌ નાસ્તિ તન્નાશે તસ્માદ્બુદ્ધેસ્તુ નાત્મનઃ ॥ ૨૩ ॥

પ્રકાશોઽર્કસ્ય તોયસ્ય શૈત્યમગ્નેર્યથોષ્ણતા ।
સ્વભાવઃ સચ્ચિદાનન્દનિત્યનિર્મલતાત્મનઃ ॥ ૨૪ ॥

આત્મનઃ સચ્ચિદંશશ્ચ બુદ્ધેર્વૃત્તિરિતિ દ્વયમ્ ।
સંયોજ્ય ચાવિવેકેન જાનામીતિ પ્રવર્તતે ॥ ૨૫ ॥

આત્મનો વિક્રિયા નાસ્તિ બુદ્ધેર્બોધો ન જાત્વિતિ । var જાત્વપિ
જીવઃ સર્વમલં જ્ઞાત્વા જ્ઞાતા દ્રષ્ટેતિ મુહ્યતિ ॥ ૨૬ ॥

રજ્જુસર્પવદાત્માનં જીવં જ્ઞાત્વા ભયં વહેત્ ।
નાહં જીવઃ પરાત્મેતિ જ્ઞાતં ચેન્નિર્ભયો ભવેત્ ॥ ૨૭ ॥

આત્માવભાસયત્યેકો બુદ્ધ્યાદીનીન્દ્રિયાણ્યપિ ।
દીપો ઘટાદિવત્સ્વાત્મા જડૈસ્તૈર્નાવભાસ્યતે ॥ ૨૮ ॥

સ્વબોધે નાન્યબોધેચ્છા બોધરૂપતયાત્મનઃ ।
ન દીપસ્યાન્યદીપેચ્છા યથા સ્વાત્મપ્રકાશને ॥ ૨૯ ॥

નિષિધ્ય નિખિલોપાધીન્નેતિ નેતીતિ વાક્યતઃ ।
વિદ્યાદૈક્યં મહાવાક્યૈર્જીવાત્મપરમાત્મનોઃ ॥ ૩૦ ॥

આવિદ્યકં શરીરાદિ દૃશ્યં બુદ્બુદવત્ક્ષરમ્ ।
એતદ્વિલક્ષણં વિદ્યાદહં બ્રહ્મેતિ નિર્મલમ્ ॥ ૩૧ ॥

દેહાન્યત્વાન્ન મે જન્મજરાકાર્શ્યલયાદયઃ ।
શબ્દાદિવિષયૈઃ સઙ્ગો નિરિન્દ્રિયતયા ન ચ ॥ ૩૨ ॥

અમનસ્ત્વાન્ન મે દુઃખરાગદ્વેષભયાદયઃ ।
અપ્રાણો હ્યમનાઃ શુભ્ર ઇત્યાદિ શ્રુતિશાસનાત્ ॥ ૩૩ ॥

(એતસ્માજ્જાયતે પ્રાણો મનઃ સર્વેન્દ્રિયાણિ ચ ।
ખં વાયુર્જ્યોતિરાપઃ પૃથિવી વિશ્વસ્ય ધારિણી ॥) doubtful addition
નિર્ગુણો નિષ્ક્રિયો નિત્યો નિર્વિકલ્પો નિરંજનઃ ।
નિર્વિકારો નિરાકારો નિત્યમુક્તોઽસ્મિ નિર્મલઃ ॥ ૩૪॥

અહમાકાશવત્સર્વં બહિરન્તર્ગતોઽચ્યુતઃ ।
સદા સર્વસમઃ સિદ્ધો નિઃસઙ્ગો નિર્મલોઽચલઃ ॥ ૩૫॥

નિત્યશુદ્ધવિમુક્તૈકમખણ્ડાનન્દમદ્વયમ્ ।
સત્યં જ્ઞાનમનન્તં યત્પરં બ્રહ્માહમેવ તત્ ॥ ૩૬॥

એવં નિરન્તરાભ્યસ્તા બ્રહ્મૈવાસ્મીતિ વાસના ।
હરત્યવિદ્યાવિક્ષેપાન્ રોગાનિવ રસાયનમ્ ॥ ૩૭॥

વિવિક્તદેશ આસીનો વિરાગો વિજિતેન્દ્રિયઃ ।
ભાવયેદેકમાત્માનં તમનન્તમનન્યધીઃ ॥ ૩૮॥

આત્મન્યેવાખિલં દૃશ્યં પ્રવિલાપ્ય ધિયા સુધીઃ ।
ભાવયેદેકમાત્માનં નિર્મલાકાશવત્સદા ॥ ૩૯॥

રૂપવર્ણાદિકં સર્વં વિહાય પરમાર્થવિત્ ।
પરિપૂર્ણચિદાનન્દસ્વરૂપેણાવતિષ્ઠતે ॥ ૪૦॥

જ્ઞાતૃજ્ઞાનજ્ઞેયભેદઃ પરે નાત્મનિ વિદ્યતે ।
ચિદાનન્દૈકરૂપત્વાદ્દીપ્યતે સ્વયમેવ તત્ ॥ ૪૧॥ var હિ ॥

એવમાત્મારણૌ ધ્યાનમથને સતતં કૃતે ।
ઉદિતાવગતિર્જ્વાલા સર્વાજ્ઞાનેન્ધનં દહેત્ ॥ ૪૨॥

અરુણેનેવ બોધેન પૂર્વં સન્તમસે હૃતે ।
તત આવિર્ભવેદાત્મા સ્વયમેવાંશુમાનિવ ॥ ૪૩॥

આત્મા તુ સતતં પ્રાપ્તોઽપ્યપ્રાપ્તવદવિદ્યયા ।
તન્નાશે પ્રાપ્તવદ્ભાતિ સ્વકણ્ઠાભરણં યથા ॥ ૪૪॥

સ્થાણૌ પુરુષવદ્ભ્રાન્ત્યા કૃતા બ્રહ્મણિ જીવતા ।
જીવસ્ય તાત્ત્વિકે રૂપે તસ્મિન્દૃષ્ટે નિવર્તતે ॥ ૪૫॥

તત્ત્વસ્વરૂપાનુભવાદુત્પન્નં જ્ઞાનમંજસા ।
અહં મમેતિ ચાજ્ઞાનં બાધતે દિગ્ભ્રમાદિવત્ ॥ ૪૬॥

સમ્યગ્વિજ્ઞાનવાન્ યોગી સ્વાત્મન્યેવાખિલં જગત્ ।
એકં ચ સર્વમાત્માનમીક્ષતે જ્ઞાનચક્ષુષા ॥ ૪૭॥

આત્મૈવેદં જગત્સર્વમાત્મનોઽન્યન્ન વિદ્યતે ।
મૃદો યદ્વદ્ઘટાદીનિ સ્વાત્માનં સર્વમીક્ષતે ॥ ૪૮॥

જીવન્મુક્તસ્તુ તદ્વિદ્વાન્પૂર્વોપાધિગુણાંસ્ત્યજેત્ ।
સચ્ચિદાનન્દરૂપત્વાત્ ભવેદ્ભ્રમરકીટવત્ ॥ ૪૯॥

તીર્ત્વા મોહાર્ણવં હત્વા રાગદ્વેષાદિરાક્ષસાન્ ।
યોગી શાન્તિસમાયુક્ત આત્મારામો વિરાજતે ॥ ૫૦॥

બાહ્યાનિત્યસુખાસક્તિં હિત્વાત્મસુખનિર્વૃતઃ ।
ઘટસ્થદીપવત્સ્વસ્થઃ સ્વાન્તરેવ પ્રકાશતે ॥ ૫૧॥

var દીપવચ્છશ્વદન્તરેવ, also var સ્વચ્છઃ

ઉપાધિસ્થોઽપિ તદ્ધર્મૈરલિપ્તો વ્યોમવન્મુનિઃ ।
સર્વવિન્મૂઢવત્તિષ્ઠેદસક્તો વાયુવચ્ચરેત્ ॥ ૫૨॥

ઉપાધિવિલયાદ્વિષ્ણૌ નિર્વિશેષં વિશેન્મુનિઃ ।
જલે જલં વિયદ્વ્યોમ્નિ તેજસ્તેજસિ વા યથા ॥ ૫૩॥

યલ્લાભાન્નાપરો લાભો યત્સુખાન્નાપરં સુખમ્ ।
યજ્જ્ઞાનાન્નાપરં જ્ઞાનં તદ્બ્રહ્મેત્યવધારયેત્ ॥ ૫૪॥

યદ્દૃષ્ટ્વા નાપરં દૃશ્યં યદ્ભૂત્વા ન પુનર્ભવઃ ।
યજ્જ્ઞાત્વા નાપરં જ્ઞેયં તદ્બ્રહ્મેત્યવધારયેત્ ॥ ૫૫॥

તિર્યગૂર્ધ્વમધઃ પૂર્ણં સચ્ચિદાનન્દમદ્વયમ્ ।
અનન્તં નિત્યમેકં યત્તદ્બ્રહ્મેત્યવધારયેત્ ॥ ૫૬॥

અતદ્વ્યાવૃત્તિરૂપેણ વેદાન્તૈર્લક્ષ્યતેઽદ્વયમ્ । var ઽવ્યયમ્
અખણ્ડાનન્દમેકં યત્તદ્બ્રહ્મેત્યવધારયેત્ ॥ ૫૭॥

અખણ્ડાનન્દરૂપસ્ય તસ્યાનન્દલવાશ્રિતાઃ ।
બ્રહ્માદ્યાસ્તારતમ્યેન ભવન્ત્યાનન્દિનોઽખિલાઃ ॥ ૫૮॥

તદ્યુક્તમખિલં વસ્તુ વ્યવહારસ્તદન્વિતઃ । var વ્યવહારશ્ચિદન્વિતઃ
તસ્માત્સર્વગતં બ્રહ્મ ક્ષીરે સર્પિરિવાખિલે ॥ ૫૯॥

અનણ્વસ્થૂલમહ્રસ્વમદીર્ઘમજમવ્યયમ્ ।

અરૂપગુણવર્ણાખ્યં તદ્બ્રહ્મેત્યવધારયેત્ ॥ ૬૦॥

યદ્ભાસા ભાસ્યતેઽર્કાદિ ભાસ્યૈર્યત્તુ ન ભાસ્યતે ।
યેન સર્વમિદં ભાતિ તદ્બ્રહ્મેત્યવધારયેત્ ॥ ૬૧॥

સ્વયમન્તર્બહિર્વ્યાપ્ય ભાસયન્નખિલં જગત્ ।
બ્રહ્મ પ્રકાશતે વહ્નિપ્રતપ્તાયસપિણ્ડવત્ ॥ ૬૨॥

જગદ્વિલક્ષણં બ્રહ્મ બ્રહ્મણોઽન્યન્ન કિંચન ।
બ્રહ્માન્યદ્ભાતિ ચેન્મિથ્યા યથા મરુમરીચિકા ॥ ૬૩॥

દૃશ્યતે શ્રૂયતે યદ્યદ્બ્રહ્મણોઽન્યન્ન તદ્ભવેત્ ।
તત્ત્વજ્ઞાનાચ્ચ તદ્બ્રહ્મ સચ્ચિદાનન્દમદ્વયમ્ ॥ ૬૪॥

સર્વગં સચ્ચિદાત્માનં જ્ઞાનચક્ષુર્નિરીક્ષતે ।
અજ્ઞાનચક્ષુર્નેક્ષેત ભાસ્વન્તં ભાનુમન્ધવત્ ॥ ૬૫॥

શ્રવણાદિભિરુદ્દીપ્તજ્ઞાનાગ્નિપરિતાપિતઃ ।
જીવઃ સર્વમલાન્મુક્તઃ સ્વર્ણવદ્દ્યોતતે સ્વયમ્ ॥ ૬૬॥

હૃદાકાશોદિતો હ્યાત્મા બોધભાનુસ્તમોઽપહૃત્ ।
સર્વવ્યાપી સર્વધારી ભાતિ ભાસયતેઽખિલમ્ ॥ ૬૭॥ var સર્વં પ્રકાશતે
દિગ્દેશકાલાદ્યનપેક્ષ્ય સર્વગં
શીતાદિહૃન્નિત્યસુખં નિરંજનમ્ ।
યઃ સ્વાત્મતીર્થં ભજતે વિનિષ્ક્રિયઃ
સ સર્વવિત્સર્વગતોઽમૃતો ભવેત્ ॥ ૬૮॥

॥ ઇતિ શંકરાચાર્યવિરચિત આત્મબોધઃ સમાપ્તઃ ॥

References in introduction include notes from the translations
by Swami Nikhilananda, TMP Mahadevan, Vidyaratna Menon,
and the sanskrit commentary by Swami Krishnanandashrami.
Transliteration is by Kim Poulsen (poulsen at dk-online.dk).
Comments by Giridhar giridhar at chemeng.Isc.ernet.in
Additional proofreading by Avinash Sathaye sohum at ms.uky.edu,
David Lyttle dhlyttle at hotmail.com, and Sunder Hattangadi,
Sreenivasa Rao Bhagavatula
From Samata Edition of Complete works of Shankaracharya

*Atma Bodha*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*